र्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शांतिर्मा
यानिद्राविभावना । एतास्त्वामभिषिंचंतु राहुकेतुश्चपूजी
ता । देवदानवगंधर्वा यक्षराक्षसपन्नगाः । ऋषयो मुनयो
गावो देवमातर एव च । देवपत्न्यो ग्रहा नागा दैत्याश्चाप्सर
सांगणाः । अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च । वृ

द्रुमा नागाः

तुष्टिः कीर्त्तिः
क्षमा लज्जा
आदित्य
श्चंद्रमा
भौमो बुध
जीवशि
तार्कजाः
ग्रहास्त्वाम
भिषिंचंतु

औं धानिन्व

स्पा प्प ८

रा॰चं २९ मं घां ज्ञिं घं रत्नानि कालश्चावयवाश्च ये। सरितः सागराः शैला
स्तीर्थानि जलदा नदाः। एतास्त्वामभिषिंचंतु सर्वकामार्थसि
ये। इति वसिष्ठसंहितायां अभिषेकमंत्रः। नारायणः स्वपरामः
सिष्ये सन्निदध्यातु वै। सर्वरोगाः सर्वतो लिपुलीदत्तु दयानिधिः।।
कुंडले चांगुलीयं च धारयित्वा। इति संक्षेपे संक्षेप तत्र जलेर
भिषेचयेत्। परिधाप्य तु वासश्च ।। श्वेतनाघवसेष्य च। कुंडले
चांगुलियं च धारयित्वा न्यसेत् ततः। वैष्णवीं मातृकां चैव तत्व
न्यासं विशारदः। तन्मूर्तिपंजरन्यासमत्स्यादिन्यासमेव च।।
पर्ववद्विधितश्छिन्द्यात्तेनाथ वंश विन्यसेत्। ततस्तु शिरसि स्थि
सहस्तं दत्वा शतं जपेत्। अष्टोत्तरं ततो मंत्रं दद्यात् दकपर्व राम॰ २९
कं। गणवयोतनाल्प फलदो भवत्येवमदीरयन्। श्रसन्तो वै र

दत्तस्मै शिष्याय मुनिपुंगवः ॥ स्वतोन्यो तिर्मर्यायीं विद्यां गच्छति
भावयेद्गुरुः ॥ आगतां भावयेच्छिष्यो धन्योस्मीति विशेषतः ॥
कृतकृत्यस्तथा शिष्यः सर्वं तस्मै निवेदयेत् । पञ्चपावचप
द्भ्यो नागर वैदग्ध्यचेतनः ॥ गोमहिषराय विपिनगृहक्षेत्रादि
कं वदु । न चेद्दद्यात्तदर्द्धं वा तद्दशांशमथापि वा । मूलकोशाद
नवृद्धा दिद्यादिज्ञानुसारतः ॥ श्रीभागवते । एतद्देवस्ति
च्छिष्यैः कर्त्तव्यं गुरुभिः पृथक् । यदैव विशुद्धभावेन सर्वार्थात्म
र्पयेद्गुरौ ॥ प्रकारान्तरमालंब्य गुरुं यत्नेन तोषयेत् । गुरुत्व
त्रकलत्रादीस्तोषयेल्लक्ष्मकादिभिः ॥ अहर्ताभिश्च वदुधाम
काघ्रादनुभवैरौः ॥ एवं मन्त्रप्रकारेरोगस्वैतच्च दक्षिणाः ॥ दृतो २
कृतकृत्यस्तथात्मानं मत्वा विप्राश्च भोजयेत् ॥ तस्यापी

शुद्धयोजितः २

दा॰ चं दक्षिणां दत्वा सर्वं तत्समर्पयेत् । बालको शिर्व चोभिक्ष
३० गुर्वीं शिर्षि समेत्तितिः । विसर्जयेच्चगुर्वादीं स्ततो भुंक्तीत नं
३० ब्रवीत । एवं लघुमुनिर्विप्रः कृतार्थस्यान्न संशयः ॥ इति दीक्षा
प्रकारः । दीक्षां च क्ष्येयसंक्षिप्तान सत्काचार्यसंमतां ॥ तत्र संसा
रे । यदैवेच्छा तदा दीक्षा गुरुरोरत्यानुरूपतः । न तिथिर्व्र तंप
होमो नसानं न जपक्रिया दीक्षायाः कारणं किंतु स्वेच्छावा
प्तातिसद्गुरौ ॥ विधि ॥ तद्देवलग्नं सुदिनं तदेव ताराबलं चं
द्रबलं तदेव । विद्याबलं देवबलं तदेव लक्ष्मीपते तेंघ्रियु
गं स्मरामि । इति दीक्षासामान्यकालः । म हुत्वे सर्वतोभद्रे नव दा॰ म॰
कुंभं निधाय च । सोदकं गंधपुष्पाभ्याम र्च्चितं वस्त्रवेष्टितं । ३०
सर्वौषधी पंचरत्नैः पंचपल्लवसंयुतं । ततो देवार्चनं कृत्वा

हुनेद्दशोत्तरं शतं । सिद्धं स्वलंकृतं वै चामुपाग्निमुपवेश्य तं
मंत्रीतं प्रोक्षतीतोयैः शतातिकुंभजलैस्तथा । मूलमंत्रेणाष्टो
त्तरशतं मंत्रितैरभिषेचयेत् । अथ संपादयेन्मंत्रं दद्यात् शिर
सि धारयेत् । समो ह्यविकल्पः सततां वा यावदस्य सिद्ध्यार्चयेद्गुरुं ।
इति संक्षेपदीक्षा । अथवाप्यशक्तः कश्चिच्छ्रे [illegible] मभ्यर्च्य साध
तं तद्वनाभिषिच्याथवा रमलेन केकरं । निधायाथ [illegible]
पलकालिंडपदेशालये विधिः । चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे
शिवालये मंत्रमात्रप्रकथनं उपदेशः स उच्यते । इत्युपदे
शः । द्विविधः स्यादाल्हयमनो घोघान्तरमुपासते । न्यासिनां
चान्तरं प्रोक्तमन्येषामुभयं तथा । पंचवक्त्रात्मिका शक्ति
र्विद्या व्योमसमुद्भवा । नादात्मकेषिवषट्कसंहितात्मा

स्वकुंभ्य

रा:चं
३१
ने

नुचिंतयन् । आत्मनस्तत्त्वचिन्तातु तस्याप्यात्मानुचिन्तनं
उभयोरैक्यचिन्तातु तद्भवातकमंतरं । द्रव्याद्याराधनं वा
यंगरहस्यस्य तदप्यपूर्णं । तदेवोक्तं संहितायां शंभुनाथेन म
वीं प्रति । नगरहिज्ञानमात्रेणोपवर्गेह चतुर्मंगलं । प्राप्नोति
चंद्रवदने दानहोमादिभिर्विना । गरहस्योपदिष्टेनादि
दृघान्तजुहुयादपि । पूजयेद्विधिनानैव कः कुर्यादित दृल
नवृत्तचारित्रोपादानमधिकारे लिभामिनि । गुरुभ्योन्यतः
सर्वेभ्यः कोवा चास्यस्पयेछितं । नारसैवासिनांशक्तिर्न एप ४
तस्तान्त्रिकलोपुग । परिव्राड्ज्ञानमात्रेणादानहोमादिभिर्वि एमः
ना । सर्वदुःखविशाचेभ्योमुक्तोभवतिनान्यथा । परिव्राड् ३१
विरक्तस्त्रविरक्तस्त्रग्रहीतथा । कुंभीपाके न मज्जेत तावभौ

कमलानने प्रत्यक्त्वियोगहस्याष्टमं मंगलैर्मंगलार्थिनः
पूजायां करतौ कुर्याद्दंष्ट्रार्दना निष्कृतं । वानप्रस्थस्य त्वपत्ये
यद्येवं कुर्यात्स्वगृहं संसारान्न निवर्त्तते विध्यति क्रमदोषतः
त्यागात्स्वयं पतितात्वेते भवेद्दुःखभाजनं । अहिंसा परमो ध
वं प र्मस्तेषामेव [illegible] न पद्धतिः । न हिंसाव्यतिरेकेणालभ्यते
तानि तानि वै । भावनाकल्पितैः पूजासाधनैरेव पूज्यते
न बहिर्योगयुक्तानामंतस्तेषां प्रसिध्यते । त्याकानं सततं
रामं संभाव्य विहरंति ये । न तेषां दुःखं किंचिद्दुःकलोपा
न चापदः । पतितिभिर्भावितैर्द्रव्यैः पूजया राम आलक्ष्यते ततः । संपा
दितो गृहस्थैश्च स एव क्रमउच्यते । इत्युपासनचिन्ता । इति
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दश्रीचरणा

रा॰ चं॰
३२

शिष्यानंदवनविरचितायांश्रीरामार्चनचंद्रिकायांप्रथमः
पटलःसमाप्तः॥ वदंतितत्तत्वविदस्तत्वंयज्ज्ञानमव्ययं॥ ब्रह्मे
तिपरमात्मेतिभगवानितिशब्द्यते॥ तच्छ्रद्दधानामुनयोज्ञा
नवैराग्ययुक्तया॥ पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतिगृही
तया॥ ततःपुंभिर्द्विजश्रेष्ठावर्णाश्रमविभागशः॥ स्वनु
ष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणं॥ तस्मादेकेनमन
साभगवान्सात्वतांपतिः॥ श्रोतव्यःकीर्तितव्यश्चध्येयः
पूज्यश्चनित्यदा॥ अव्यक्तब्रह्मसेवीहनिर्बीजंवृततत्परबुधै
तंदुर्ज्ञेयाद्यरिपुहृत्गोमूर्त्तंब्रह्मततोभजेत्॥ इतिभक्तेवचः
विनाश्वधर्मंचलिंचिद्देवताराधनादिकं॥ नतत्श्रेयस्यतेत
यस्मात्सततोन्सेकतरुपातं॥ इतिश्वधर्मनिष्ठा॥ ब्राह्मे

राम:
३२
मा॰ २

म्रहूर्त्तेऽध्याय चिंतयेद्रघुनंदनं ॥ रामरामेति रामेति तारका
ख्यं परं स्मृतं ॥ श्रीपर्वं जयमध्यस्थं हरिर्जयांतं विचक्षणाः ॥ युधि
ष्ठिरत्यक्तराज्योऽप्युवरदनुवनेपन्नपङ्काश्रियापायाः पारितो स्य
शीक्षमाभ्यामजितपथि तेजोयो हरिंद्रानुजाभ्यां ॥ वेदपादु
र्यवाख्याः प्रियविरहरुतः स्वारोपितभूविजृंभेस्त्वत्रघे वर्द्ध
सेतुं खेलदेवदहनः कौशलेंद्रोवतान्नः ॥ इति स्मरणं ॥ अ
थ मलदन्तधावोदन्त्यपि निषिद्धं पुनर्दक्षिणास्यो निवीती
कुर्यान्मूत्रादि शौचं च बहिरप्यथ सलिलात्तत्र लिंगं मृदैकां ॥ पं
चापानेऽप्य हस्तेदशपुनरुभयोः ॥ सप्तचेतद्वहस्त्यैकैग्रतापारि
५२ कुमात्येतिव निपतति सुप्यात्तदर्हं निशायां ॥ इतिमत्रोत्स दि.स.२
र्गशौचविधिः ॥ कलादौपादशौचं विमलमपजलं त्रिः ॥ पिबे

रा॰ चं
३३

तुंमृज्ये द्विर्दे पिन्वं गुष्ठकाभ्यां सजलं मभिमृज्ये नासिकारंध्र
युग्मं ॥ अंगुष्ठानामिकाभ्यां नयनयुगसुतं कर्णयुग्मं कनि
ष्ठांगुष्ठाभ्यां नाभिदेशो हृदयमथ तलेनांगुलीभिः शिरोंसौ
स्त्याचमनविधिः । दंतान्नु धावितव्याभवति परिमिताद्वाद
रित्यामंत्वात्प्रातःक्षीर्यादिकाष्ठात् कुटजखदिरपलाशौर्विना
न्नार्कबिल्वैः । सत्कागंडूषपंक्ता नहि रपि कुशमते दर्शनी
मंगुलीभिर्नदीभक्ता चपर्वेरापपिनखलु नवनस्पतौ संक्रां
तिपाते । अन्नाद्यायाम्समुद्धेजे सोमोराजायमागमत् । सम
मुखं प्रमार्क्ष्यते वर्षे सावभगेन चेति । दंतधावनमंत्रः ।
सर्वा तिर्थारि तासंसोभ्यसंतु चिर्मलानिविसल्लसरो । वनितिकं
घातनेध्यायेद्रा घवेवेवे ह पितरां । अस्तु रामोन चान्योति

रामः
३३

बुद्ध्यैवाहं न शोकभाक् । सच्चिदानंदरूपोहं नित्यमुक्तस्वभा
ववान् इति भावना ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ
विष्णो भवदाज्ञयैव । प्रातः समुत्थाय तव प्रियार्थं संसार
यात्रामनुवर्त्तयिष्ये । जानामि धर्मं न च मे प्रवृत्तिर्जानाम्य
धर्मं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा
नियुक्तोस्मि तथा करोमि । इति प्रार्थनाविधिः । ऋग्वेदोक्तवि
धानेन कृतं यज्ञसूत्रकं । यज्ञोपवीतमिति तत्तु मंत्रै
र्धारयेद्बुधः । न दक्षिणाभिमुखो नार्द्रः कुर्यात्केशप्रसाधनं
स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः । धौताम्बरोसिता
न्दर्भाग्रान्गृहीत्वा मतिवर्त्तिषा । नद्यादितीरमागत्य तत्रा
चान्तश्च स्वविधानवित् । अधौतेन च वस्त्रेण नित्यनैमि

ग॰चं
३४
34

त्रिंकी क्रियां न कुर्वन् फलं न चाप्नोति दत्तं भवति निःफलं । धौतं
छिन्नपातितं वा ततः कुर्यात्संकल्पमादितेः । तामार्गे गतया
स्नानं करिष्ये हं तद्दत्तया । स्नानस्याहारतो रामाद्धि हृद सरसि मा
र समुद्रे तु दर्शे व गाः से भैरवा वागोरजोभिर्भवति विपदि तत्के
वले वापि मंत्रैः स्नास्यं वा हृति पिंडाभरयपतिनये ह वमं तीर
त्रास्तव वर्ज्याः सिंहात्प्राक कर्कटे च द्वापरिजलधिगता स्तीर
निष्क्राश्च भस्का । स्वास्थित पुंडरीकाक्षं मंत्रमूर्त्तिं प्रधं स्मरन् ।
ग्रतं तादित्यसंकाशं वासुदेवं चतुर्भुजं । संखचक्रगदाप
द्ममुकुटं वनमालिनं । तत्पादोदकजां धारां निपतंतीं तु
मर्द्धनि चिंतयेत् कुलरंध्रेतो प्रविशंतीं स्वकां तनुं । तया संक्षा ग॰प॰:
लयेत्सर्वमंतर्देहगतं मलं । ततस्तत्क्षणाद्विरजो मंत्री जायते ३४

स्फटिकोपमः । इदंस्नानंचरन्मांत्रंसहस्रमधिकंस्मृतं ॥ किंत्वादौवै

दीकंस्नानंततस्तांत्रिकमाचरेत् । विनश्यांगेषडंगानिप्राणा

यामपुरःसरं । श्रीसर्पमंडलात्तीर्थमावाह्यांकुशमुद्रया । वनि

सनेनचाप्लाव्यकवचेनावगुंठयेत् । संरक्ष्यास्त्रेणमूलेनाभि

त्रयेद्ध्रुद्रसंख्यया । वारिक्षेपंततःकुर्यादस्त्रेणाप्यर्कसंख्यया

तिमंत्र्यतस्मिंध्यायेत्परमेशंत्तमाजपेन्मतं । उन्मज्यकुंभमु दृष्टिः

द्रांचबध्वास्नायाद्विघटंततः । शालग्रामशिलातोयंतुशी लप

लंवमिश्रितं । कृत्वाशंखेभ्रामयन्स्वैःप्रक्षिपेन्निजमूर्ध

नि । शालग्रामशिलातोयमपीत्वायस्तुमस्तके । प्रक्षेपनेप्र

कुर्वीतब्रह्महत्यासमानिगद्यते । पृथिव्यांयानितीर्थानितानितानि

तिष्ठंतिसागरे । सप्तसागरतीर्थानिपादेविप्रस्यदक्षिणे

ए: चं
२५

ततः संक्षेपतो देवानमनुष्यांस्तर्प्पयेत् सितून ॥ पीडयित्वांबरं चाप
प्रक्षाल्याचम्य यत्नतः ॥ धारयेद्वाससी शुद्धे परिधानोत्तरीयके ॥ अ
च्छिन्ने सदृशे भुक्ते अप्राचामेत्पीडसंस्थितः ॥ बहुत्वं परिशिष्टं यती
नामासनं श्लक्ष्णासर्पाकारं तु कारयेत ॥ अन्येषां च चतुःपाद
चतुरस्रं च कारयेत ॥ गोसक्तमन्मयं भिन्नं तथा पालाशपिप
लं ॥ लोहबद्धं सदेवार्कं वर्जयेदासनं बुधः ॥ दानमाचमन
होमभोजनदेवतार्चनं ॥ प्रौढपादो न कुर्वीत स्वाध्यायं चैव त
र्प्पणं ॥ आसनारूढपादस्तु जानुनोर्वाथ जंघयोः ॥ कृताव
सक्थिको यश्च प्रौढपादः स उच्यते ॥ अथ दन्तधावनविधिः ॥ केशावाम
खिन्नोपवीती द्वाभ्यां प्रक्षाल्य पैकरौ ॥ द्वाभ्यां मार्ज्जयेच्च मज्ज
द्वाभ्यामुन्मार्जनं तथा ॥ एकेन हस्तं प्रक्षाल्य पादावपि तथैव ए: २५
तः ॥ संप्रोक्ष्य एकेन मूर्द्धानं ततः संकर्णतोदिभिः ॥ आस्यनासा

क्षिकरांगुष्ठेनाभ्युरः कंभुजं स्पृशेत् एवमाचमनं कृत्वा साक्षा
न्नारायणो भवेत् केशव १ नारायण २ माधव ३ गोविंद ४ वि
ष्णु ५ मधुसूदन ६ त्रिविक्रमः ७ वामन ८ श्रीधर ९ हृषीके
श १० पद्मनाभ ११ दामोदर १२ संकर्षण १ वासुदेव २ प्रद्यु
म्न ३ अनिरुद्ध ४ पुरुषोत्तमः ५ अधोक्षज ६ नृसिंह ७ अच्यु
त ८ जनार्दन ९ उपेंद्र १० हरि ११ कृष्ण १२ चतुर्विंनामैतैर्ना
मभिः इति वैष्णवमाचमनं ललाटे केशवं ध्यायेत् नाराय
णं मध्योदरे माधवं हृदये ध्यायेत् गोविंदं कंठकूपे उदरे द
क्षिणे पार्श्वे विष्णुं ध्यात्वा विचिंतयेत् तत्पार्श्वे बाहुमध्ये तु वि
न्यसेत् मधुसूदनं त्रिविक्रमं वन्तत्कंधे वामपार्श्वे तु वामनं
श्रीधरं बाहुके वामे हृषीकेशं तु कंधरे अपरे पद्मनाभं तु कंदे कु

कैस्तमोदरं स्पृशेत । तत्प्रक्षालनतोयेन वासुदेवेति मूर्द्धनि । दक्षि
णे तु करे विप्रो विभृयात्सुदर्शनं । पद्मं तस्य चापरे यथ शंखं कूर्मं
गदां तथा । ललाटे तु गदां धार्या मूर्द्धि चापं शरास्तथा नंदकं चै
व हृन्मध्ये शंखं च चक्रे भुजद्वये । शंखचक्रांकितो विप्रः श्मशाने
म्रियते यदि वै तत । प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद । १
तिलकं धारयेत् । निःपीडपिलावस्त्रेण तु पश्चात्संध्यां समाचरे
त् । अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत । वस्त्रं त्रिगु
णीकृतं यस्तु निःपीडयति मूढधीः । वृथा स्नानं भवेत्तस्य निष्पी
डयति चाम्बुनि । रामात्मकं गृहं नत्वा रामसंध्यां समाचरेत् । स
पंप्रापृष्ठमध्याह्ने रामं ध्यात्वा मनुं जपेत ॥ जलमध्ये त्वरा संसे
ध्यकं वैचनामगंधवै ॥ वज्रीकृत्य जलं सम्यक्कदंभमलनाम

त्रवित् । आवाहनादिमुद्राभिस्तीर्थमावाह्य पर्वत । ब्रह्मांडो
दरतीर्थानि करैः स्पृष्टानि ते रवे । तेन सत्येन मे देव तीर्थं दे
हि दिवाकर । गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे
सिंधुकावेरि जलेस्मिन् सन्निधिं कुरु । एवमावाह्य चाराध्य वि
धिवज्जलं मुने । आदायांजलिना सम्यक् जपेन्मालामतः
सकृत् । जलं दक्षिणहस्तस्थं सव्यहस्ते विनिक्षिपेत् । तल्लिख
तां वुनाम हंसिंचेन्मालामनुस्मरन् । दशाक्षरेरातच्छंद
अभिमंत्र्ये जलं पिबेत् पुनरंजलिमादाय जलमर्द्धं नि त्रि
क्षिपेत् । मंडलस्थाय रामाय नमो ऽर्घ्यं कल्पयाम्यहं । ततो र्थी
रामो हमस्मीति गायत्रीं निपतो जपेत् । जन्मप्रभृति य
त्पापं दशभिर्जीतितं द्विविधं परोक्षेन सतेनैव सहस्रेरा

रा॰चं जपेनवा । वदेस्मदेशारध्येयेति विघ्नहेतिपदं ततः । सीतापदं समुद्
३१ त्य वह्निजायां ततो वदेत । श्रीमहीत्यपितन्नाम्यरामेश्वरापि प्रचोद
यात । एषासामैष्टम गायत्री भक्तानां भक्तिमुक्तिदा । पुरश्चरणे राम
श्रीरामादिरेषा स्यास्य चतुर्लक्षजपावधि । पञ्चपावत्वपूजादि सर्वं पूर्ववदा
४ चरेत । [redacted] गायत्रीमन्त्रमेवयुग्पच्छति । मायादिरपि
वै...पुरमादिखण्डिवमने । मदनेनापि संपुटः । संमोहयति
मेदिनीम् । अनयाराधितो रामः सर्वाभीष्टं प्रयच्छति । तर्प्पयेच्च
ततो मूलमन्त्रोच्चारपूर्वकं । रामं तर्प्पयामि नमः । पीठदेवा
दिपूर्वकं । चत्वारिंशाद्दिर्त्वादेवी सीताद्यष्टावतुःक्रमात । दश
दीर्त्तिर्प्पयेत्यश्चान्मध्येमध्ये रघूद्वहं । नाममन्त्रैर्भुवेद्दवं चत्वा राम:
रिंशत्तदनं । त्वेवं ...रामेद्रामे यथाशक्त्यामनिश्चरं क्रुत्वे ३१

तत्स्वरूपं हंसमव्यक्तं त्रिसंध्यं च यथाविधिः । कृतकृत्यो भवेन्मंत्री स
त्यं सत्यं च नान्यथा ॥ हंसः पूर्वं समुच्चार्य सोहमित्यजपां जपेत् ।
ऋषिर्हंसो व्ययं छंदः परमात्मात्र देवता । सर्वात्मनेहं तु सोम
त्मने शिरः जना शिखो । निराभासापुकं वचं ध्रतनुः । सूक्ष्मौ यस्य चो
दयाद् दृष्ट्वा घ्राणं मूर्धा नं यस्य विप्रा वदंति खं वेनाभिचत्रुबी चंद्र
सूर्यौ । दिशः श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्यो सौ सर्वभूतात
रात्मा । एकविंशति साहस्त्रं स्वासोश्वासजपेन षट् । शताधि
केन श्रीरामः प्रीतो स्तिति सर्जयेत् ॥ इति रामसंध्या ॥ रामं नत्वा
गुरुनर्ज्यपश्चान् कुशासनः पुष्पधारकान् । भक्तात येव पादुकं
न रामभक्तवागच्छेद्विशेत ॥ उ ॥ हंसः प्राग्वा धूपे होमार्चवर गते
दिवानिशि । भवेन्न क्षिं द्वितीया वेदब्बे वृक्षादि तिथ्येष्या ॥ देव नं ५८

ग: चं
३८

पूजां ततः कुर्यान्नाममंत्रैः सकृत्सकृत। दद्याद्दानं यथाशक्ति पात्रेभ्य
मपरे तथा। इति दिनाग्रभागकल्पविधिः। दिवसस्य द्वितीयेंऽशे वेदस्या
भ्यसनं चरेत। मीमांसा तर्कधर्मार्थसच्छास्त्राणामपि द्विजः। सा
लंकारः सुमनाः संपश्येन्मंगलाष्टकं। गोम विप्रांबु हेमघृम
तिलेक्षन्नपानिति। इति द्वितीयदिनभागकल्पविधिः। विभागेऽह्नः
तृतीये तु पोष्यवर्गार्थं तु पोषितुं। देशशास्त्राविरुद्धेन द्रविणं ध
र्मतोऽर्जयेत। ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा। सत्या
नृताभ्यामपि वा न श्ववृत्त्या कथंचन। ऋतमुंछशिलं प्रोक्तम
मृतं यदयाचितं। मृतं तु नित्ययाचा स्यात्प्रमृतं कर्षणं स्मृतं राम:
सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं। सेवा श्ववृत्तिर्यैस्त ३८
न सम्यक्तेन तद्वा हरेत। स्वच्छंदचरितः कामो विक्रीतात्मा तु सेवकः

ल्पिताः पशवो वस्त्रः कन्यकाश्च रजस्वलाः देवताश्च स निर्माल्याहं निवेदितं पुराकृतं ।

पत्नीकृत्यात्मनः प्राणान्ये वर्त्तंते द्विजाधमाः । तेषामुद्धारकानाम
न्नं भुक्त्वा चांद्रायणं चरेत । अपूनयेस्स्व देहे भागो तिष्ठेन्नं त्रीण
मंगे । रामाज्ञाकृतविश्वासो दाता सर्वेश्वरो यतः ॥ इति तृतीय
दिनभागविधिः ॥ अथ षष्ठमाह्ने द्विभक्तस्य चतुर्थांशे यथा द्विजः ।
कुर्यान्माध्यान्हिकं स्नानं जपदेवार्चनादिकं । घृतगोमयाभ्यु
क्तकुशासनमृद्दिका दिव्यध्याक्षतानि सकमंडलुचंदनादि नी
त्वा जलांतिकमनेरुस मार्षिकं च स्मृत्वाह्वयेत्सकलतीर्थं
पवित्रकीर्त्तिस्वरघोत्तमं मंत्रवरैः स्नात्वा संध्यां विधाय च । स्वत
कर्त्तृकषैश्च देवादीन्तर्प्पयेत्तिलैः । तर्प्पणं भुवनेशस्य
स्नानसंध्यांचतर्प्पणं । पूर्ववद्वाचयेन्मंत्री राममनत्वा विसर्ज्ज
पेत । ततो देवालयं गत्वा न्यासं कृत्वार्च्चयेद्धरिं । लक्ष्मणं

दृष्ट्वा शं माण्डके स्वस्त्यादं ऽ वस्त्रं रामे ल्लघी:३

रा॰ चं॰ ३९ नुत्वां विशेन्मंत्री मंदिरं सुंदरं स्वकं ॥ इति चतुर्थे दिन विभागक
ल्प ॥ गृहागतो नृपेन्द्रामं पंचमे दिवशांशके ॥ प्रक्षाल्य पादावाचम्य
दद्यादर्घं रवेर्बहिः ॥ यो देवः पूजकस्याघ्यं पूजां दृष्ट्वाऽतीव तत्फल
प्रदाता वृध्यादिकं सर्वं यस्मै रामात्मनेनमः ॥ अन्येन मनुनानल
द्वारदेवान्प्रपूजयेत ॥ अपुगात्ति सं हिता पापत पूज्य नं क्रमेणात्
अनुष्ठानक्रमेणोतः ॥ तं देवो धृत्सु लिख्यते ॥ ॐ नमो रामचन्द्राय
गंगतोशायते नमः ॥ सस चित्रे सोणि वायपऐं क्लीं श्रीं परशक्तये
देदीप्यनाप्पायनमः ॥ क्षं क्षेत्रपतये नमः ॥ पुष्पाक्षतादिभिः पूजा:
श्रीराम महादेवता पूर्व द्वारे परतः स्वसीन प्रथमामन्त्रेणैव सुधीः
द्वार श्रीयेत मश्वार्हं देहल्यं तदधस्तात ॥ द्वारस्य शोभन स्थापय रा॰प॰:
यो दक्षवामयोः ॥ धात्रे विधात्रे गंगायै यमुनायै च पर्वतः ॥ भद्रा ३९

यमुभद्राय गोदां कुम्भांच दक्षिणतो । चंडप्रचंडाय परे वातापीं च प
श्चिमे । शंखपद्मनिधी येच वारुणीं वैन्यांतथोत्तरे । चतुर्द्वारं स्तुसं
पूज्य गृहोपरि ततो र्च्चयेत् । गृहेशाय गृहोपाय कुलदेव्यै नमो
ह्रीति । नमः शास्त्रे शार्ङ्गाय पद्दिनाकाय पर्कं नमः ॥ न्याभ्यां मंत्री
तं पुष्पं स्वरयोगेन वामतः ॥ निःसार्य विघ्नसंघं त्रिः पार्ष्णिघातं स
म्यसेत् । देहलीमस्पृशन्हपादं पूर्वं प्रविश्य च । शेषांश्च विघ्ना
पीठाय वास्तुपुंसे नमो र्चयेत् ॥ इति द्वारपूजाविधिः ॥ वंसाष्टमद्या
रुधिरत्तीतरापल्लवनिर्मितं । वर्ज्जयेदासनं धीमान् कृपाद्रि
व्याप्द्धिः खेदं । कृष्णाजिनं व्याघ्रचर्म्म कौशेयं वेत्रनिर्मितं । वृ
षाजिनं कंबलं वा कल्पयेदासनं मृदु । निविश्य तस्मिन्नन्तादौ
नुपात्रासादनमाचरेत् । सपाद्यं विविधैः पुष्पैः पूरयेत्पुष्पडा

रा: चं
६०

लिकां । तुलसीपुष्पजां स्याद्यैर्माल्यैर्वहुविधैरपि । स्वपुरो दक्षिणेतो
यैः शुद्धवारिसुपूरितं । कलशं स्वपुरो वामभागे तु विनियोजयेत्
अन्यानि पूजाद्रव्याणि पुरस्तादेव निक्षिपेत् । इत्यासादनं । तु
लसीकाष्ठघटितैः रुद्राक्षाकारकारितैः । शंखचक्रगदापद्मपा
दुकाकारकारितैः । निर्मितां मालिकां कंठे विधायार्चनमाचरेत्
तथामलककमालां च सम्यक् पुष्पमालिकां । निर्माल्यतुल
सीमालां शिरस्यापि निधाय वै । निर्माल्यचंदनेनांगमंकयेत्त
स्य नामभिः । तस्यायुधानि वाह्यांगे तेनैव द्विजसत्तमः ॥ पापिष्ठो
वाप्यपापिष्ठः सर्वेणाप्य सएव च । भवेदेकाधिकार्ये न पूजाकर्म
णि संश्रयः । इति मालाधारणं । पुष्पाक्षतादि द्रव्याणां कुर्यात्तज्ज
लादिशोधनं । क्षालने नानलेपाद्यैर्मत्रिंशच्छिंसमाचरेत् । अ

रा:म:
४०

व्यग्रलेनात्मशुद्धिं क्षितिशुद्धिमतश्चरेत् । विलिप्य वेदिकां सम्यक्मं
डलं तत्र कारयेत् ॥ शालितंडुलचूर्णैश्च नीलपीतसितासितैः । लि
खेदष्टदलं पद्मं चतुरस्रं समावृतं । घद्धारा तो कर्णिकामध्ये कोरा ।
ग्रेवस्त्रसंवृतं । साध्यमेवं ततः शोभारेखाभिरूपशोभितं । संपूज्य मंड
लं चैवं तत्र सिंहासनं न्यसेत् ॥ चंद्रातपपताकैश्च तोरणैरपि
सर्वतः ॥ चित्रितं तत्र तत्रापि भित्तिस्तंभस्थलादिषु ॥ स्त्रनुमात्रं तु
यः कुर्यान्मंडलं राघवायतः ॥ मद्रूमयेर्हेतु भिद्यो सोनंतफल
मश्नुते ॥ इति शुद्धिचतुष्कं ॥ पद्मस्वस्तिकभद्रादिहेमरोगाकुंडंप च्य
पी३ ड्यं । पृथिल्वयेति मंत्रेण स्थापयेदासनं बुधः ॥ पृथिल्वयेति मंत्र पी३
स्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसनस्थापने
विनियोगः ॥ पृथिल्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धार

रा:चं
४१

यमांदेविपविघ्नं गृह्य चासनं । ॐ भूर्भुवः स्वः कूर्माय नमः । अग्रधारस्था
(नमः) क्रियेदुष्ट विघ्नावरोपयश्रीनृसिंहायेति पूजयेत । अपयक्रोमंतुभू
तानि पिशाचाः सर्व्वतो दिशं ॥ सर्वेषाम विरोधेन ब्रह्मकर्म समा
रभेत । पार्ष्णिघातत्रयं धृत्वा मंत्रेणानेन मंत्रवित् । भूतसंघान्
घ्नन्सार्प्ये से विसेदासनं बुधः ॥ ॐ सर्वास्त्राय फट् प्रोक्ता दिशाब
धं स्मृतं स्मपि ॥ करास्फालनतो दिक्षु ततो गुर्वादिसंततिः । इत्या
सनं । विनायक नमस्तुभ्यं सव्यासेच समर स्वती ॥ दक्षिणांसे पूर्व
वद्दुर्गां चिक्षेत्र अं पुनः ॥ ततश्चादितश्चार भ्य नमो गुरु परंपरा
नमोस्त्वनंताय नमोस्तु वेधसे नमो वशिष्ठाय नमोस्तु शक्तये
पराशराय च नमोस्तु शाश्वते नमस्तु ते सत्यवती सुताय च । पा
णिन्याचार्यपादांश्च गौड पादांश्च विद्यासिकां ॥ भगवत्पूज्यगोविंद

राम:
४१

पादाब्जं वंदे ततस्तमहं । श्रीमच्छ्रीशंकराचार्यान् विश्वरूपान् सुरेश्वरान् ॥
बृहत्कृतान् वृक्षरूपान् वल्लविद्याप्रवर्त्तकान् । माधवाद्या सुदेवाहुतान्
वेयज्ञकृतस्तथा । गंगाधरान्नागदेवान्मंडनशार्ङ्गि पण्डितान् परमा
नंदराजाहूतान्नैयल्लीशाभिधांस्तथा । निंबादित्यान्मरुत्सिंहान्मा
र्ज्ञातरुद्रशः प्रभून् । श्रीमद्विष्णुस्वामिराजान् विष्णुभक्तिप्रवर्त्तकान्
वंदेहं प्रभुराजांश्च विष्णुस्वामिकुमारकान् ॥ नमो गुरुभ्यो गुरुपादु
काभ्यो नमः परेभ्यः परपादुकाभ्यः ॥ आचार्यसिद्धेश्वरपादुकाभ्यो
नमोस्तु सीतापतिपादुकाभ्यः ॥ इति गुरुनमानतिः ॥ ततो देवं नम
स्कृत्य कुर्यात्तालत्रयं पुनः । [illegible] [illegible] अस्त्राय फट् प्रोक्त्वा भ्रामयेद्दिशि
तां करं । कालस्मलोकरिष्येहं श्रीरामप्रीतये र्चनं ॥ संकल्प्यैवं ततस्त
न्यासं स्थानान्मायां तु संहरेत् । प्रातिलोम्येन क्षलयोलकारेलरे

न्त्री इ

मि

ए॰चं
४२

कारके । हलयक्षवषाकारेष्पसलयक्षवषकारके । क्रमेणोवमपर्यंतंल
यमत्साधयत्ततः । ॐमितिब्रह्मरंध्रे सहस्राक्षे नियोजयेत् । इतिमा
त्रिकोपसंहारः । ततस्तु चिंतयेदंतर्देवस्थानत्रयांतरे । ज्योतिर्म
यमनुस्यूतं सत्यज्ञानसुखात्मकं । आत्मनः परितो वह्निप्राकार
त्रारोपणायच । भूतप्रेतपिशाचेभ्यो विधायतदनंतरं । अद्भिः पु
ष्पाक्षतैश्चैव वह्निबीजाभिमंत्रितैः । प्रक्षिपेत्परितो मंत्री भूयपवि
घ्ननिवृत्तये । हृदंबुजे वसत्कंदसंभूते ज्ञाननालके । ऐश्वर्याष्टद
लोपेते स्थितो वैराग्यकर्णिके । आधारोग्रमात्रो जीवस्तु चिंतनि
यो मनीषिभिः । नेतं सोहं समंत्रेणाद्वादशांते स्थितः परः । तेन
संयोज्य विधिवद्भूतशुद्धिमथाचरेत् । इतिजीवस्थापनं । पादा
धानालंबुजां कांपीतांदुहितां देवतां । चतुरस्रांपंचवर्णां लो

ए॰म॰
४२

ह्रैं ह्रः फट् भुवं जले । जाला घाना पि पद्मां कं श्वेत मर्द्धेन्दु वै सवं । र
स रूप स्पर्श शब्दं ह्रीं ह्रः फट् जलं शुचौ । नाभ्यास्यदं तं प्राद्युम्नं त्रिको
णं स्वस्तिकारसं तो । वह्निरूपं स्पर्श शब्दं रं ह्रः फट् समीरं तो । भू प
र्यंतं हृदो वायुः षड्बिन्दु स्पर्श शब्दवत् । व न्नं संकर्षणं तो धूम्रं ह्रैं ह्रः ५८
फट् विहायसि । धूमे ध्वान्त धूसरध्वांतं वासुदेवं शशब्दकं । स्वांतं ह्रौं
ह्रः फट् हकारे हं मे स्वतत्त्वके चतत । प्रकृतौ तां राम चन्द्रां स्वोप
स्वरूपतो संहरेत । इति भूतसंहारः । शरीराकारभूतानां भूता
नां यद्विशोधनं । अव्ययब्रह्मसंपर्का भूतशुद्धिरियं मता । मूला
ज्ञानं ततः पापं जन्मादि दुःखदं वपुः । प्राणापानौ निरुध्याथ
तस्य रूपं विचिंतयेत् । महापातक पंचांगं पातकोपांग संभृतं
उपपातक रोमाणं लोकलक्ष्मं क्रूरातिभीषणं । नाभौ षड्बिन्दु संयुक्तं

रा॰ चं
४२

43

षडस्रा शितवर्तुले । वामया पूरिते वायौ ईयं तेन शोषयेत् । रह
दि त्रिकोणे निर्गच्छत्त्वचित्तिके रक्ते तेजसि । वह्निने कुंभिते वायौ
ईरं ईं संदहत्स्मितं । बीजं चंद्रसहस्रा भमत्ता कांछे स्थितं स्मितं
ईवं ईं रं रं प्लुतं पीयूषं स्रावयतैनं तेन रेचयेत् । इत्याघाप्लावनं । वरुणी
वमृतसंहारं वृक्षम्याप्लावनं ततः । कलैवं तु सरूस्वान्वे रामो
हमिति संस्मरेत् । पजकार्थितं ततो भक्त्यादेहं संभावयेत्पुनः
ध्यायेज्जीवात्मनं नैकां गुरुमंगं शुभप्रदं । मूलाधारोत्थया पा
त्रस्य भालालेसो एमत्र मागतः । ईकुपकडि तिसंयम्य प्राणान्द्वि
न्यस्य मूर्द्धनि । अपरवडीवूस्तत्तोरामात्मेरकः पुरुषस्तथा । प्र
कृतिर्मर्सहान्मूकतेस्ततोहं त्रिगुणात्मकः । तस्माद्धा एतस्मादात्म
न आकाशः संभूतः । आकाशाद्वायुर्वायोरग्निः । अग्नेरापः अ

राम:
४२ स्मा

अः पृथिवी पृथिव्या ओषधय ओषधीभ्योन्नमन्नाद्रेतः रेतसः पुरुषः
स वा एष पुरुषोन्नरसमयः । ग्लौमिति पृथिवीजे ततं दृसंध वी
न्तानयेत् । ईं हूं ईमिति बीजेनावयवीकरणं भवेत् । सोहम
त्रैणा तामसं वीनाद्यंते सिद्धमावितं । ध्यात्वैवं वृत्तसंधेरात
कप त्वजीवकलां न्यसेत् ॥ हृदि हस्तं निधायावतार प्राणप्रतिष्ठया
ईं प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुःसा
मानि छंदांसि प्रतिछंदो वा छंदः ॥ क्रियामयं वपुः प्राणाख्या
देवता प्राणप्रतिष्ठा विनियोगः ॥ ओं कं खं गं घं ङं पृथिव्य ग्रं ४
प्तेजो वाय्वाकाशात्मने अं हृदयाय नमः ॥ ओं चं छं जं झं ञं शब्द
स्पर्शरूपरसगंधात्मने ईं शिरसे स्वाहा ॥ ओं टं ठं डं ढं णं श्रो
चक्षु त्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट् ॥ ओं तं थं दं धं नं

रा॰ चं ४४

एं वाक्पाणिपादपायूपस्थात्मने ऐंकवचापरूं। ॐ यं फं वं भं मं
ॐ वक्तव्यादानगमनविसर्गानंदात्मने ॐ नै चक्षुपायवौष
ट्। ॐ यं रं लं वं सं षं सं शं मनोबुध्यहंकारचित्तात्मने अस्त्रा
यफट्। ॐ श्रां नाभेरधः। ॐ ह्रीं हृदयपादनाभि श्रीं क्रों मस्तका
दा हृदयं। ततः ॐ यं त्वगात्मने नमः हृदि। ॐ रं असृगात्मने
नमः। ॐ लं मांसात्मने नमः। ॐ वं मेदात्मने। ॐ शं अस्थ्यात्मने
ॐ षं मज्जात्मने। ॐ शं शुक्रात्मने। ॐ हं प्राणात्मने। ॐ सं जी
वात्मने। न्यासमेवं प्रकारेण कृत्वा ध्यायेद्देवतां। रक्ताम्भोधि
स्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः। पाशं कोदण्डमि
क्षूद्भवमथगुणमप्यंकुशं पंचबाणान्। बिभ्राणासृक्क
पालं त्रिनयनलसितापीनवक्षोरुहाढ्या देवी बालार्क

ॐ ४ ॐ हं परमात्मने नमः; हृदयान्मस्तकपर्यन्तम् ४

वर्म्मी भवतु सुखकरी प्राणशक्तिः परा नः । इति ध्यानं । ओं आं ह्रीं
क्रों यं रं लं वं शं षं सं हं सः । मम प्राणा इह प्राणाः । पुनस्तान्येव बीजान्यु
च्चार्य मम जीव इह स्थितः । पुनस्तान्युच्चार्य मम सर्वेन्द्रियाणि । पु
नस्तान्येवोच्चार्य मम वाङ्मनश्चक्षुः सर्वे प्राणा इहायान्तु स्वस्त
ये सुचिरं सुखेन तिष्ठन्तु स्वाहा । इति मन्त्रः । ततो जन्मादिकर्म
ष्ट क्रियासंस्कारसिद्धये । षोडशवर्षां वा वर्त्तिं कलाशक्तिं प
रां स्मरेत् । इति पुनर्देहोत्पादनं । चत्वारि वाक्परिमिता पदा
नि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता
नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति । इति भूतशुद्धिः
भूतशुद्धिं विना कर्तुः जपहोमार्चनक्रिया । भवन्ति निष्फलाः ॥

सोऽहं २

श्रोत्रजिह्वा घ्राण ४

प्राणप्रतिष्ठा

त्रि २

रा॰ चं
६५

सर्वैः प्रकारेणाप्यनुष्ठिता । तस्मादस्मात्मकाद्यावै ऽउत्पन्ना
लिपिमातृकाः ॥ अथातिन्नत्वा सकार्यार्था तत्समान्यासः प्रकीर्त्ति
तेन्यासेविना जपं प्राहुः निष्फलं मकमाप्नुते ॥ न्यासात्तदात्म
कोहिस्यादस्मामोमूलाधारधृंजयेनतः ॥ वामांगुष्ठात्तद् दक्षिरातः
पादापरतम्त्ति संज्ञकः ॥ संहारो विपरीतोसोक निष्क्रांतः स्थिति
प्रदः ॥ शिरम्यारभ्य पादांतो देहोत्पत्ति संज्ञकः ॥ संहारो विप
रीतोन्योमध्याद्वाः स्थितिनामिगः ॥ स्थितिन्यासो गृहस्थस्य
संहारोवनिनोयतेः ॥ ब्रह्मचारिणाउत्पत्तिः स्त्रियः भद्रस्य वै
षदः ॥ इतिन्यासनिर्णयः ॥ ईड्यापर यत्प्रातः तां स्वरे स्पर्शेष्वकु
भयेत ॥ रचयेद्याद्रिके वैतौ ततः पिंगलया पुनः ॥ प्राणायामं रा॰ ः ६५
मंत्रयंत्वेवंकृत्वा व्यापकमारभेत ॥ अकारादिः क्षांतवर्णो

नपेवयूर्णेवायोः कुम्भनं रेचनं पुनः इडयापानतो द्वाभ्यां पूरणोदितं यं पुनः

इति प्राणायामः ॥

रापादतलमस्तकं ॥ अस्य श्रीमातृकामंत्रस्य ब्रह्मा ऋषिः देवी गायत्री छंदः । श्रीमातृका सरस्वती देवता हलो बीजानि स्वराः शक्तिः स्वीयमानश्रीरामसमातृकाङ्गन्यासे विनियोगः ॥ ऊर्ध्वास्ये वैरिंचि छंदो देवता बीजशक्तयः ॥ शिरो वदन हृद् गुह्य पादेषु क्रमतो न्यसेत् । इति मातृकाष्यादिन्यासः ॥ करांगुलीनां रेखा मूले वैरैके कं प्रविन्यसेत् । विन्यसेत्तु रावंपाणीतले परपृष्ठयोरपि । ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः ॥ ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः । ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः । ॐ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः । ॐ ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः । ॐ अं यं रं लं वं शं षं सं हं लं क्षं अः करतलकरपृष्ठाभ्यां नमः । एतान्येव षडंगेषु योजनीयानि हृदयाय

ए॰ चं
९६
46

नमः सिरसे स्वाहा शिखायै वषट् ॥ कवचाय हुं नेत्रत्रयाय वौषट्
अस्त्राय फट् ॥ इत्येकारेण ॥ इति केवलमातृकाषडंगः ॥ पंचाश
द्वर्णैर्भिदैर्विहितवदनदोः पादयुक्कुक्षिवक्षोदिशां भास्वत्क
पर्दाकलितशशिकलामिंदुकुंदावदातां ॥ अक्षस्रक्कुंभ
चिंतालिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छाकल्पाम
तुच्छस्तनजघनभरां भारतीं तां नमामि ॥ इति केवलमातृका
ध्यानं ॥ अथांतर्मातृकान्यासः ॥ कंठहृन्नाभिगुह्यके पायौ भ्रू
मध्यगे पद्मे षोडशद्वादशच्छदे ॥ दशपत्रे च षट्पत्रे चतुःपत्रे
द्विपत्रके ॥ पंचाशद्वर्णविन्यासपत्रसंख्याक्रमाद्भवेत् ॥ एकैक
वर्णमेकैकपत्रांते बिंदुयुक्तं न्यसेत् ॥ इत्यंतर्मातृकान्यासः ॥ राम:
एवमंतः प्रविन्यस्य मनसा तां बहिर्न्यसेत् ॥ शिरोवदन ९६

वक्त्रेपि चक्षुः श्रोत्रयुगे प्यथः। नासाकपोलयुगले तथौष्ठाधर
योरपि। ऊर्द्ध्वाधोदंतपंक्तौ च मूर्द्धास्ये षोडशस्वरान्। कवर्गं हृद
वा के: पंचसंधिस्थले न्यसेत्। टतवर्गे ह्यं पादसंध्यग्रे पि तथा
न्यसेत्। पवर्गे पार्श्वयुगले पृष्ठे नाभ्युदरेषु च [redacted] हृदो मि
ले वतु लकुक्षौ स्वदाकर्यां हृदये जठराननयोश्चैव व्याप
कं विनियोजयेत्। ॐमाधंतानमातोवा विंदुविंदुवर्जि
तः। पंचाशदक्षरन्यासः क्रमेणैवं विधीयते। इति केवलमा
तृकान्यासः। ततः सविंदुकन्यासे ऋषिछंदः पूर्ववत् स
हारसारदा देव्यंगानि विंदयुतैः स्वरैः। पक्षलजंहरिते
पीतमद्दग्रटंकं॥ विद्याकरे विरतंदधतीत्रिनेत्रा। पंचेंदु
मौलिमरुरागामरविंदसंस्था वर्त्तोश्वरीपरोमततनमा

विन्दुयुक्तां मातृकां न्यसेद्विलोमतः । इति न्यासः ॥ अथ कलान्यासः

रा॰ चं ४१ कर

रनमः । इति सबिंदुमात्रिकान्यासः । अस्य श्रीपञ्चप्रणवमातृकाख्य
कलान्यासस्य प्रजापतिः ऋषिः गायत्री छन्दः
कलासरस्वती देवता इष्टार्थे विनियोगः । ॐ अं हृदया
य नमः । ॐ ईं शिरसे स्वाहा । ॐ ऊं शिखायै वषट् । ॐ ऐं कवचा
य हुं । ॐ औं नेत्रत्रयाय वौषट् । ॐ अः अस्त्राय फट् । इति ष
डंगः । हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां । टं
कं शूलं कपालं दरममृतलसद्धेमकुंभं वहन्ती मुक्ताविद्यु
त्पयोदस्फटिकनवजपाबंधुरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रा
सकलशशिनिभा शारदां तां नमामि । इति कलादेव्या ध्यानं
ॐ अं निवृत्त्यै नमः । ॐ आं प्रतिष्ठायै नमः । ॐ इं विद्यायै नमः ए॰म॰ ४१
ॐ ईं शान्त्यै नमः । ॐ उं इन्धिकायै नमः । ॐ ऊं दीपिकायै नमः

ओं ऋं रेचिकायै नमः । ओं ॠं मोचिकायै नमः । ओं लृं परायै नमः । ओं
लॄं सूक्ष्मायै नमः । ओं एं मडायै नमः । ओं ऐं ज्ञानायै नमः । ओं ओं अ
मृतायै नमः । ओं औं आप्यायन्यै नमः । ओं अं व्यापिन्यै नमः । ओं अः
व्योमरूपायै नमः । १६ ओं कं सृष्ट्यै खं ऋद्ध्यै गं स्मृत्यै घं मेधायै ओं ङं कान्त्यै ...सेन नमः नमः
ओं चं लक्ष्म्यै छं द्युत्यै जं स्थिरायै झं स्थित्यै ञं सिद्ध्यै टं जरायै ठं पा
लिन्यै डं शान्त्यै । ढं ऐश्वर्यायै णं रत्यै । तं कामिकायै थं वरदायै
दं ह्लादिन्यै । धं प्रीत्यै नं दीर्घायै पं तीक्ष्णायै । फं रौद्र्यै । बं
भयायै भं निद्रायै मं क्षुधायै रं क्रोधिन्यै लं क्रियायै वं उत्कार्यै
ओं शं मृत्यवे षं पीतायै सं श्वेतायै हं अरुणायै ळं असितायै
ओं क्षं अनन्तायै । इति पञ्चाशत्कलान्यासः । ओं अं अमृतायै नमः । ओं आं
मानदायै । ईं तुष्ट्यै । उं पुष्ट्यै । ऊं रत्यै । ऋं धृत्यै । ॠं शशिन्यै । लृं च
ओं इं पुष्ट्यायै नमः

ता॰ च॰
९८

w96

ॐ ऐक्षिपैनमः १

छ्विकायै । ॐ लं कान्त्यै । ॐ एं ज्योत्स्नायै । ॐ डं प्रीत्यै । ॐ ढं भ्रुगदायै । ॐ णं पूर्णा-
यै । ॐ णः पूर्णामृतायै नमः । इत्यंताः स्वरस्थाने ध्येवनम तत्वा-
कं भं तपिन्यै । खं बं तापिन्यै । गं फं धूम्रायै । घं पं मरीच्यै । ङं नं ज्व-
लिन्यै । चं धं रुच्यै । छं दं सुषुम्नायै । जं थं भोगदायै । झं तं विश्वा-
यै । ञं णं बोधिन्यै । टं ढं धारिण्यै । ठं डं क्षमायै । मं पं धूम्रार्चिषे ।
ङ ष्मायै । लं ज्वलि[illegible]यै । वं ज्वालिन्यै । शं विस्फुलिंगि[illegible]यै । षं सु-
श्रियै । सं स्वरूपायै । हं कपिलायै नमः । एता हस्तपादाङ्गुल-
सन्धिषु न्यस्तव्याः । लं हव्यवाहायै नमः । इति मस्तके । सं कव्य-
वाहायै नमः । इति व्यापकं । इत्यष्टत्रिंशत्कलान्यासः । माया-
धेपुटितान्वर्णान्केशवादीन्यथापरान् । सशक्तिकान्न्यसे-
द्धरोनित्वमस्तकादिक्रमेणतु । यथा । ॐ केशवादिमातृको
मायालक्ष्मीकामबीजपूर्वो न्यसेत [illegible] मूर्ध्नि ।

ता॰ म॰
९८

घलात् इत्यपि
पाठः १

अमता

न्यासस्य साध्यनारायणो ऋषिः गायत्री छंदः । लक्ष्मीनारायणो
देवता हस्लौं बीजं । स्वरसंपुटशक्तिः इष्टार्थे जपे विनियोगः । ॐ
श्रीं ॐ नमो नारायणाय हंसः सोहं । ॐ अः कं खं गं घं ङं । ॐ ॐ ह्रीं हं
सः सोहं । ॐ नमो नारायणाय क्रुद्धोल्काय स्वाहा हृदये । ॐ श्रीदेव्यै नमः ४ शांत
श्रीं ॐ नमो नारायणाय हंसः सोहं ॐ चं छं जं झं ञं ॐ ह्रीं हंसः सो
हं । ॐ नमो नारायणाय महोल्काय स्वाहा । श्रीं पश्चिन्द्ये इति शि
रसि । ॐ श्रीं ॐ नमो नारायणाय हंसः सोहं ऐं टं ठं डं ढं णं । ॐ
ह्रीं हंसः सोहं ऐं ॐ नमो नारायणाय वीरोल्काय स्वाहा । ॐ
विष्णुपत्न्यै इति शिखायै । ॐ श्रीं ॐ नमो नारायणाय हंसः
सोहं । ॐ तं थं दं धं नं । ॐ ह्रीं हंसः सोहं । ॐ नमो नारायणाय विद्यु
दुल्काय स्वाहा । श्रैं वरदायै इति कवचं ॥ ॐ श्रीं ॐ नमो नारा

ए॰ चं परायणाय हंसः । सोहं हं पं फं बं भं मं । ॐ ह्रीं हंसः सोहं हं ॐ नमो नाराय
४९ णाय हंसः सोहं । ॐ यं रं लं वं शं षं सं हं ळं क्षं ह्रीं हंसः सोहं ॐ ॐ न
मो नारायणायाच्युतानन्ताय स्वाहा ॐ भूः भ्रू लिन्पे इत्यस्त्रे वषट् । ॐ
५१ ह्लाय स्वाहा । ॐ श्रीं वरदायैक वचाय हुं शार्ङ्गोऽकाय स्वाहा । ह्लौ
कमलरूपाय नेत्राभ्यां वौषट् । ॐ अनंताय स्वाहा । ॐ भूः भू लि
न्पे ॐ स्वाहाय फट् । इति केशवादि मात्राषडङ्गः । विघारविंदम
कुटामततपम्न कुंभको मोदकीदरसुदर्शनशोभिहस्तं । सौदा
मिनीमुकुरकांति विभाविलक्ष्मीनारायणात्मकमस्वं हृदि
मातमूर्त्तिं । इति केशवादिमातृकाध्यानं । ॐ ह्रीं श्रीं क्लीं ऐं ह्लीं एमः
श्रीं ह्रीं केशवाय कीर्त्यै नमः । इति सर्वत्र संपुटः । ॐ आं नारायणा ४९
य कांत्यै ऐं माधवाय तुष्ट्यै । ऐं गोविंदाय पुष्ट्यै । ॐ विष्णवे धृत्यै

ॐ मधुसूदनाय क्षान्तै ॐ त्रिविक्रमाय क्रियायै ॐ वामनायदया
यै ॐ श्रीधराय मेधायै ॐ हृषीकेशाय हर्षायै ॐ पद्मनाभाय श्रद्धा
यै ॐ दामोदराय लज्जायै ॐ वासुदेवाय लक्ष्म्यै ॐ संकर्षणा
य सरस्वत्यै ॐ प्रद्युम्नाय प्रीत्यै ॐ अनिरुद्धाय रत्यै । १६ ॐ च कि
रोजयायै ॐ गदिने दुर्गायै ॐ शार्ङ्गिणे प्रभायै ॐ खड्गिने स
त्यायै ॐ शङ्खिने चण्डायै ॐ हलिने वाण्यै ॐ मुशलिने विला
सिन्यै ॐ शूलिने विजयायै ॐ पाशिने विरजायै ॐ अंकुशि
ने विश्वायै ॐ मुकुन्दाय विनदायै ॐ नन्दाय सुनन्दायै ॐ नन्दि
ने स्मृत्यै ॐ नराय ऋद्ध्यै ॐ नरकजिते समृद्ध्यै ॐ हरये तुष्ट्यै ॐ कं
कृष्णाय पुष्ट्यै ॐ सत्याय मत्यै ॐ सात्वताय मत्यै ॐ सौराय क्षमायै
ॐ शूराय परमायै ॐ जनार्दनाय उमायै ॐ भूधराय क्लीन्नायै

आ० २

ए:चं
५०
50

मं विश्वमूर्त्तये विलिन्नायै। मं वैकुण्ठाय वसुदायै। पं लगात्मने पु
रुषोत्तमाय वसुधायै॥ रं ग्रसगात्मने चलिने परायै। लं मासा
त्मने बलानुज्ञाय परायरायै। वं मेदात्मने बलाय लक्ष्म्यै
शं अस्थ्यात्मने वृषघ्नाय सधायै॥ षं मज्जात्मने वृषाय पृच्छा
यै। सं शुक्रात्मने हंसाय प्रसंगायै। हं प्राणात्मने वराहाय विशा
लायै। लं क्षिपाशक्त्यात्मने विमलाय अमोघायै। ॐ ह्रीं श्रीं
क्लीं परमात्मने नृसिंहाय विद्युतायै मोघायै नमः। केशवादि
न्यासोऽन्यासमात्रेणादेहिनां॥ अच्युततत्त्वदस्तात्पेवैत
त्वं सत्यं न संशयः। इति केशवादिमातृकान्यासः। वाग्ज्ञाप्य एनः:
मात्रिका वर्णीमातृकायाः स्वशक्तिमान्॥ श्रीकण्ठादीन्त्या ५०
दित्यान्नसेस्यानेमुतेऽहि॥ श्रीकण्ठादिन्यासस्य ब्रवरी नं२

[redacted]नमः पंफंबंभंमं औं कनिष्ठिकाभ्यां नमः ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं क्षं अः करतल

स्य ऋषिः अनुष्टुप् छंदः। अर्द्धनारीश्वरो देवता ह्लौं बीजानि

स्वराः शक्तयः ज्ञानविज्ञानार्थे विनियोगः। ऐं ह्रीं श्रीं अं कं खं गं

घं ङं अं आं अंगुष्ठाभ्यां नमः। ऐं ह्रीं श्रीं चं छं जं झं ञं इं ईं तर्जनी

नमः। ऐं ह्रीं श्रीं उं टं ठं डं ढं णं उं ऊं मध्यमाभ्यां नमः। ऐं ह्रीं श्रीं एं तं थं

दं धं नं ऐं अनामिकाभ्यां नमः। ऐं श्रीं कांच समो भयभागम

र्द्धनारीश्वर। गिरिसुताहरमंब विद्धं पाशाभयाक्षवलय

वरदहस्तमीशां सततं लोनमसे सकलवांछितवस्तु सिद्धौ। ऐं

ह्रीं श्रीं अं श्रीकंठेशपूर्णोदरीभ्यां नमः। इति मन्त्रके अं आं अ

नंतेशविरजाभ्यां नमः। आनन वृत्तरल्पादिषु स्थानेषु न्य

सेत्। ओं इं सूक्ष्मेश शाल्मलीभ्यां नमः। ओं ऋं अप्रलिपांश गो

मुखीभ्यां नमः। इति सर्वत्र। ओं ईं त्रिमूर्तीश लोलाक्षीभ्यां नमः

लकरपृष्ठाभ्यां नमः ऐं रं एवं हृदयादि भ्यां न्यासः ५

सिंदूर

ॐ

ता: च

५१ सा

51

ॐ ऊं अमरेश्वरवर्तुलाक्षीभ्यां नमः । ॐ ऋं अर्घीशदीर्घघोराभ्यां नमः
ॐ ॠं भारभूतीशदीर्घमुखाभ्यां नमः । ॐ ऌं तिथीशगोमुखी
भ्यां नमः । ॡं स्थाण्वीशदीर्घजिह्वाभ्यां । ॐ एं हरेशकुण्डोदरीभ्यां
ॐ ऐं झिण्टीशोर्ध्वकेशीभ्यां । ॐ ओं भौतिकेशविकृतमुखाभ्यां नमः
ॐ औं सद्योजातोत्तज्वालामुखीभ्यां । ॐ अं अनुग्रहेशोल्काज्वाला
मुखीभ्यां । ॐ अं अक्रूरेशश्रीमुखीभ्यां । ॐ अः महासेनेशविद्या
संमुखीनमः ॐ कं क्रोधीशमहाकालाभ्यां । ॐ खं चण्डेशसरस्वती
भ्यां । ॐ गं पञ्चान्तकेशगौरीभ्यां नमः । ॐ घं शिवोत्तमेशत्रैलोक्य
विद्याभ्यां । ॐ ङं एकरुद्रेशमन्त्रशक्तिभ्यां । ॐ चं कूर्मेशात्मशक्ति
भ्यां । ॐ छं एकनेत्रेशभूतमातृकाभ्यां नमः ॥ ॐ जं चतुराननेश
लंबोदरीभ्यां । ॐ झं अजेशद्राविणीभ्यां ॥ ॐ ञं सर्वेशनागरीभ्यां

टङ्के

ता:म: ५१

ॐ टं सोमेशखेचरीभ्यां। ॐ ठं लांगलीशमंजरीभ्यां। ॐ डं दारुकेशरू
पिणीभ्यां। ॐ ढं अर्धनारीश्वरेशकिरातीभ्यां। ॐ णं उमाकांते
शवकोदरीभ्यां। [redacted] ॐ तं आषाढीशपूतनाभ्यां। थं दंडी
शभद्रकालीभ्यां। ॐ दं अत्रीशभद्रयोगिनीभ्यां। ॐ धं मीनेशशं
खिनीभ्यां। ॐ नं मेषेशगर्जनीभ्यां। ॐ तर्जनीभ्यां। पं लोहितेश
कालरात्रिभ्यां। ॐ फं शिखीशकुब्जिनीभ्यां। ॐ वं छगलंडेशकप
र्दिनीभ्यां। ॐ भं द्विरंडेशवज्राभ्यां। ॐ मं महाकालेशविजया रा
भ्यां। यं वालीशसुमुखेश्वरीभ्यां। ॐ रं भुजंगेशरेवतीभ्यां। ॐ लं
पिनाकीशमाधवीभ्यां। वं खड्गीशवारुणीभ्यां। ॐ शं बके
पा२ शवायवीभ्यां। ॐ षं श्वेतेशरक्षोपधारिणीभ्यां। ॐ सं भृग्वीश
सहजाभ्यां। ॐ हं लकुलीशलक्ष्मीभ्यां। ॐ ह्लं शिवेशव्यापिनी

रा॰ च
५२
52

मादयः प्रातिलोम्येकांनास्युःस्वरसंज्ञकाः नमः परायपूर्वन्तुप्रणवांते व्यवस्थितः जीवः प्राणश्च बुद्धिश्चाहंकारोमनस्तथा
न्यां । ॐ क्षं संवर्त्तकेश महामायायाम्बानमः । इतिव्यापकं । इति श्री
कंठादिन्यासः । मुद्रासविंदुकायुक्ताकलाभिः केशवादिभिः । श्रीकं
ठमातृकाचान्नन्यासांगे पंचमीस्मृता । हृद्रेर्युक्ताकेवलावा
मन्त्रनांकर्मारंभे मातृकां विन्यसेद्बुधः । मंत्राः स्युः कुर्वते तस्य सिद्धिं
द्वेषैः सार्द्धयातिनाशंजराच । अथ तत्वं प्रवक्ष्यामि तत्वन्यास
तदर्थिनां । यस्य तु न्यासमात्रेरा तत्वमेव प्रजायते । ॐ मं नमः
परायजीवात्मनेनमः । ॐ भं नमः । परायप्राणात्मनेनमः । ए
तद्द्वयं सर्वांगे । ॐ वं नमः । परायबुद्ध्यात्मनेनमः । ॐ फं नमः पर
यअहंकारात्मनेनमः । ॐ पं नमः परायमनआत्मनेनमः
एतत्त्रयं हृदये । ॐ नं नमः परायशब्दात्मनेनमः । इतिमूर्द्धि ॐ
धं नमः । परायस्पर्शात्मनेनमः । इति मुखे । ॐ दं नमः परायर

सर्वांगे हृदि विन्यस्य शब्दादीं श्च ततः परम् त्रुटिः

रा॰म॰
५२

पात्मनेनमः ।इति ॐ हृदये ॐ थंनमः ।परायरसात्मनेनमः ।इतिउप
स्थे ।ॐ तंनमः परायगंधात्मनेनमः ।इतिपादयोः ।ॐ रांनमः पराय
श्रोत्रात्मनेनमः ।इतिश्रोत्रयोः ।ॐ ठंनमः परायत्वगात्मनेनमः
इतित्वचि ।ॐ इंनमः परायचक्षुरात्मनेनमः ।इतिचक्षुषोः ।ॐ ठं
नमः परायजिह्वात्मनेनमः ।इतिजिह्वायां ।ॐ दंनमः परायघ्रा
णात्मनेनमः ।इतिघ्राणे ।ॐ जंनमः परायवागात्मनेनमः ।
इतिवाचि ।ॐ छंनमः परायपाणात्मनेनमः ।इतिपाण्योः ।ॐ जंन
मः परायपायात्मनेनमः ।इतिपायौ ।ॐ घंनमः परायपादात्मने
नमः ।इतिपादयोः ।[redacted]
[redacted] ।ॐ चंनमः परायउपस्थात्मनेनमः ।इत्युपस्थे ।१ ।ॐ ङंनमः ॐ
परायआकाशात्मनेनमः ।इतिमूर्ध्नि ।ॐ घंनमः परायवाय्वात्म

रा॰ च॰ नेनमः। इतिमुखे। ॐगंनमःपरायतेजआत्मनेनमः इतिहृदये
५३ ॐखंनमःपरायसलिलात्मनेनमः। इतिगुह्ये। ॐकंनमःपराय
श्रप्पा३ पृथ्व्यात्मनेनमः। इतिपादयोः। ॐशंनमःपरायहृत्पुंडरीकात्मने
नमः। ॐक्षंनमःपरायसोममंडलात्मनेषोडशकलात्मनेनमः
53 ॐसंहंनमःपरायसोममंडलात्मनेषोडशकलायनमः। ॐहंन
मःपरायसूर्यमंडलात्मनेद्वादशकलायनमः। [redacted]
नमः। ॐनमःपरायवह्निमं
डलात्मनेदशकलायनमः। एतच्चतुष्कंपरस्यहृदि। ॐवंनमःप
रायपरमेष्ठ्यात्मनेवासुदेवायनमः। इतिमूर्ध्नि। ॐयंनमःपरा रामः
यपुरुषात्मनेसंकर्षणायनमः। इतिमुखे। ॐवंनमःपरायवि ५३
श्वात्मनेप्रद्युम्नायनमः। इतिहृदि। ॐलंनमःपरायनिवृत्त्या

त्मनेअनिरुद्धायनमः। इतिगुह्ये। ॐक्षंनमःपरायसर्वात्मनेनारा
यणायनमः। इतिपादयोः। ॐक्ष्रौंनमःपरायकोपात्मनेनृसिंहा
यनमः। इतिव्यापकः। अतत्वस्याप्यपूज्यस्यतत्वव्याप्तेर्हितुनापुनः
तत्वन्यासमितिप्राहुर्न्यासंतत्वविदोवुधाः। कुर्यात्तत्रविन्या
सेनपूतोभवतिध्रुवं। तदात्मनातुप्रविश्यभगवानिहतिष्ठति
यतःसएवतत्वानिसर्वतस्मिन्प्रतिष्ठितं। इतितत्वन्यासः। श्री
रामःतन्मूर्त्तिपंजरन्यासंकथयिष्येधुनापरं। यस्मात्फलां
तरंनास्तिपुंसस्तन्मूर्त्तिसिद्धये। ॐअं[illegible]केशवायधात्रे[illegible]न
मः। इतिललाटे। ॐआंनृंरांनारायणायअर्यमणेनमः। इति
नाभौ। ॐइंमांमाधवायमित्रायनमः। इतिहृदये। ॐईंभेंयंगोवि
न्दायवरुणायनमः। इतिकंठे। ॐउंगंनंविष्णवेअंशायनमः।

ए॰ च॰ इतिदक्षिणपार्श्वे। ॐ उं वं मं मधुसूदनायभगायनमः। इतिदक्षिणां
५४ से। ॐ ऐं तैं रां त्रिविक्रमायविवस्वतेनमः। इतिदक्षिकंधरे। ॐ पें वा
रां वामनायइंद्रायनमः। इतिवामपार्श्वे। ॐ श्रों सं मां श्रीधरायपू
54 ष्णेनमः। इतिवामांशे। ॐ औं दें यं हृषीकेशायपर्जन्यायनमः
इतिवामकंधरे। ॐ अं वां नं पद्मनाभायत्वष्ट्रेनमः। इतिपृष्ठे। ॐ
अः पं मं दामोदरायविष्णवेनमः। त्रिगायत्रीछंदसेनमः। इतिमुखे
श्रीरामायपरमात्मनेनमः। इतिहृदि। रां बीजात्मनेनमः। इतिगुह्ये
नमः शक्तयेनमः। इतिपादयोः। इतिऋष्यादिन्यासः। ॐ रां अंगुष्ठाभ्यांनमः
ॐ रीं तर्जनीभ्यांनमः। ॐ रूं मध्यमाभ्यांनमः। रैं अनामिकाभ्यां रा॰म॰
नमः। रौं कनिष्ठिकाभ्यांनमः। रः करतलकरपृष्ठाभ्यांनमः। व्यसे ५४
षडंगेर्वा। इतिकरन्यासः। ॐ रां हृदयायनमः। रीं शिरसेस्वाहा

हुं शिखायै वषट् । ऐं कवचाय हुं । ऐं नेत्राभ्यां वौषट् । रः अस्त्राय फट्
इति हृदयादिन्यासः । शिरो भ्रूमध्य हृदय नाभि गुह्य पादेषु स्थलेषु । मूलम
न्त्राक्षरैर्न्यासः मन्त्राक्षरन्यास उच्यते । इत्यक्षरन्यासः । रां नमः इति शिर
सि । रामाय नमः [redacted] । नमो न
मः इति पादयोः इति पदन्यासः । मंडूकाय नमः इत्याधारे । कालाग्निरु
द्राय नमः इति स्वाधिष्ठाने । कच्छपाय नमः इति नाभौ । आधारशक्त
ये नमः । रत्नद्वीपाय नमः । रत्नमंडपाय नमः । कल्पवृक्षेभ्यो नमः ।
रत्नसिंहासनाय नमः इति हृदये । धर्माय नमः इति दक्षिणस्कं
धे । ज्ञानाय नमः इति वामस्कंधे । वैराग्याय नमः इति दक्षिणपार्श्वे
अनैश्वर्याय नमः इति वामपार्श्वे । सप्रतिवलयायैतावत्सहस्र
फणाय अनंताय नमः । इति हृदयकमलमध्ये न्यसेत् । तन्मध्ये
अधर्माय इति वक्त्रे अज्ञानाय नमः इति लिंगे अवैराग्याय नमः इति दक्षिणपार्श्वे २

इति नाभौ

हृत्सेप

क्षीरसागरा

यनमः ५

रत्नवेदिका
येनमः ५
वामपादमू
ल ऐश्वर्या
यनमः दक्ष
पादमूल

ग०चं
५५
55

फरोपरिस्त्रानंदकंदाय नमः । संविन्नालाय नमः । सर्वतत्वकम
लाय नमः । प्रकृतिपत्रेभ्यो नमः । विकारमयकेसरेभ्यो नमः । पंचा
शद्वर्णाग्रकर्णिकायै नमः । ओं ह्रं अर्कमंडलाय द्वादशकला
त्मने नमः । ओं ह्रं सोममंडलाय षोडशकलात्मने नमः । न४
ओं ह्रं वह्निमंडलाय दशकलात्मने नमः । सं सत्वाय प्रबोधात्म
ने नमः । तं तमसे मोहात्मने नमः । ओं रं रजसे प्रवृत्यात्मने नमः । ज२
ओं ह्रं आत्मने नमः । इति तस्य दक्षिणतो ओं ह्रं अंतरात्मने नमः ।
इति पश्चिमे । ओं ह्रं परमात्मने नमः । इत्युत्तरे । ओं ह्रीं ज्ञानात्मने ग०म:
नमः । इति पूर्वे मध्ये मायातत्वाय नमः । कालतत्वाय नमः । वि ५५
द्यातत्वाय नमः । परतत्वाय नमः । इत्येकैकोपरि पूर्वादिक्षु स
र्वं मंत्रान् संन्यस्य प्रागादिदलेषु मध्ये च नव शक्तीर्न्यसेत । त

ध्या हि । विमलायैनमः । उत्कर्षिण्यैनमः । ज्ञानायैनमः । क्रियायैनमः
योगायैनमः । प्रह्व्यैनमः । सत्यायैनमः । ईशानायैनमः । अनुग्रहायैन
मः । ॐ नमो भगवते विष्वक्सेन सर्वभूतात्मने वासुदेवाय सर्वात्म
संयोगयोगपद्मपीठात्मनेनमः । इति मध्ये । तस्मिन्पीठे सहस्त्रा
स्योप [?] दित्यसंकाशं मंत्रं ध्यात्वा समार्गेतोज्ज्वलावानीय [?] व्यापकं न्य
सेत ॥ इति व्यापकोन्यासः । एवं विन्यासस्य विधिवन्मासाक्षान्ना [?]
रायणो भवेत् । ज्वररोगाभिचाराद्याः प्रलयं यान्ति नान्यथा
भूतप्रेतपिशाचाश्च तथैव ब्रह्मराक्षसाः । कूष्मांडाश्चैव डा
किन्यो नैव द्रष्टुमपि क्षमाः । य एवं विन्यसेद्धीमान् रामः सा
क्षात्स्वयं भवेत् । नातः परतरं किंचित्पावनं पापमल्लिं [?]
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदविरचित

श्रीचरणोशिष्यानंदवनविरचितायांश्रीरामार्च्चनचंद्रिकायां
द्वितीयः पटलः ॥ अथ ध्यानं ॥ अयोध्यानगरे रम्ये रत्नमंडपम
ध्यगं । ध्यायेत्कल्पतरोर्मूले रत्नसिंहासनं शुभं । तन्मध्ये ष्टद
लं पद्मं नानारत्नप्रवेष्टितं । तत्र श्रीरामचंद्राख्यं ध्यायेत्तेजः
परात्परं । प्रकृत्या सीतया श्यामं स्थितंसत्वतपश्चयावहं । देवा
सुरमुनींद्रैश्च योगीवृंदैश्च सेवितं । चतुर्भुजं शंखचक्रगदा
पंकजधारिणं । किरीटहारकेयूररत्नकुंडलशोभितं । देवता
गुरुमंत्राणां भावयेदेकमात्मना । गदादि शंखोज्ज्वधरं भवा
रिं सयो ध्यायेन्मोक्षमाप्नोति सर्वं ॥ इति स्तुतिः । एवं ध्यात्वा जपे
मंत्रं षट्सहस्रं दिने दिने । वाचः श्रियः पतिर्भूत्वा कविर्भव
ति वत्सरात । ऐं ह्रीं कान् विलान् भोगान् भुक्त्वांते स पदं व्रजेत्

सर्वं द्दुष्टशुभं
माप्नोत्सस्संश
यं उत्पुतिः

पद्मसिंहासनेतस्मिन्वीरासनसमाश्रितं । सम्यंज्ञानमयीमु
द्रांदधानंदक्षिणेकरे । तेजःप्रकाशनंवामेजानुमूर्द्धनिचाप
रं । जानकीवल्लभंदेवंसिद्धनिर्मलमतोपमं । व्याख्याननिरतं
देवंद्विभुजंरघुनंदनं । वसिष्ठवामदेवादिमुनिभिःपरिसेवि
तं । वामभागेसमासीनांसीतांकांचनसन्निभां । भजतांका
मदांनित्यंकरोत्पलकरांबुजां । लक्ष्मणंपश्चिमेभागेधृत
छत्रंसचामरं । पार्श्वेभरतशत्रुघ्नौतालवृन्तकरावुभौ । एवं
ध्यात्वाजपेन्मंत्रंज्ञानलक्ष्म्याःसभाजनं । अपतांमंत्रितोम
त्रंध्यानयोगेनधीमता । पुरश्चरतोकल्पेनविनाविफलस्तप
नुः । वक्ष्यमाणेमहाचक्रेकर्णिकायांनिरंजनं । सर्वंसंव्याप्य
सकलंसच्चिदानंदविग्रहं । चतुःपादस्ततोरूपंरामस्याऽ

स्रुगेय्यंग्रह
नूमंत्रंवाच्व
पलेसुप्ल
कम ५

रा॰ च॰
५७
57

तकर्मतोः। सेव्यते योगिनो नित्यं सोहं भावेन तद्विधः। तथा च
श्रुतिः। अथैते श्लोका भवंति। अकाराक्षरसंभूतः सौमित्रि
र्विश्वभावनः। उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः। प्राज्ञा
त्मकस्तु भरतो मकाराक्षरसंभवः। अर्द्धमात्रात्मको रामो ब्र
ह्मानंदैकविग्रहः। श्रीरामसान्निध्यवशाज्जगदानंदकारि
णी। उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनां। सा सीता भ
वति ज्ञेया मूलप्रकृतिसंज्ञिता। प्रणवत्वात्प्रकृतिरिति वदं
ति ब्रह्मवादिनः। ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्या
नं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकाला
तीतं तदप्योंकार एव सर्वं ह्येतद्ब्रह्मायमात्मा चतुष्पाज्जा
गरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभु

गो॰

रा॰ म॰
५७

वैश्वानरः प्रथमः पादः स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंश
तिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः यत्र सुप्तो न कंच
न कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान
एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानन्दभुक् चेतोमुखः
प्राज्ञः तृतीयः पादः एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष
योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां नान्तःप्रज्ञं न बहिःप्रज्ञं नो
भयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यम
ग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्र क४
पंचोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः स
६८ दोज्ज्वलो विघातत्वात्कार्यहीनः स्वात्मबंधरहितः सर्वद्वैतरहि
तः आनन्दरूपः सर्वाधिष्ठानः सन्मात्रो निरस्ताविद्यातमोमोह

रा॰चं॰ मेवेति संभाव्याहमोंतत्सद्‌ब्रह्म रं ब्रह्म रामचंद्रश्चिदात्मकः ॥ सोहमोंतत्
५८ द्रामभद्रपरंज्योतिरसोहमित्यात्मानमादाय मनसा ब्रह्मरोकी
कुर्यान्सदा रामोहमित्येतत्तत्वतः प्रवदंतियेनतेसंसारिरोगान्नवै
58 रामएवनशंसयः इत्युपनिषद्घएवंवेदसमुक्तोभवतीतिपा
द्मवत्कः ॥ एतदेवपरंध्यानंमेतदेवपरंतपः ॥ एतदेवपरंराम
पूजनंभवकृत्तनं ॥ अश्वमेधसहस्राणि वाजपेयशतानि च
एतस्यध्यानयोगस्य कलांनार्हंति षोडशीं ॥ इति ध्यानं ॥ ततः
सामान्यार्घोदकेन चतुरस्रंवेष्टकोणांत्रिकोणं मंडलंकलशं
५८ धेमुद्रयावषट्कृष्णपुष्पाक्षतैरग्नेयनैर्ऋत्यवायव्येशानेषु राम:
हृदयशिरःशिखाकवचानि मध्येनेत्रंपूर्वादिदिक्षुश्वास्त्रं ५८
पूज्यमाधारमूलमंत्रेणाप्रक्षाल्यः ॥ वह्निमंडलायदशधर्मं

ततोजपंजपेन्मंतेश्रंत्वमाहाय [illegible] गृहाणास्मत्कृतं जपं ध्यायेद्‌रूपोदकेत्वातयेदेवस्य दक्षिणे
करेपत्रतिः

कलात्मने श्रीरामार्घ्यपात्रासनाय नमः । इत्याधारं प्रतिष्ठाप्य
पूर्वाद्यग्नदिक्षु उपर्यधश्च क्रमेन दशकलाः पूजयेत् । तद्यथादि
यं धूम्रार्चिषे रं ऊष्मायै । लं ज्वलिन्यै । वं विस्फुलिंगिन्यै । शं सुश्रियै ।
सं सुरूपायै । हं कपिलायै । ळं हव्यवाहायै । क्षं कव्यवाहायै नमः ।
इति सर्वत्र आधारोपरि एताः कलाः संपूज्य । ततः शंखं संस्थाप्य
संशोध्य । अं सूर्यमंडलाय द्वादशार्घ्यकलात्मने श्रीरामार्घ्य
पात्राय नमः । इति पात्रं त्रिपाद्याधारे निधाय । कं भं तपिन्यै नमः
खं बं तापिन्यै नमः । गं फं धूम्रायै । घं पं मरीच्यै । ङं नं ज्वालिन्यै
चं धं रुच्यै । छं दं सुषुम्नायै । जं थं भोगदायै । झं तं विश्वायै । ञं णं
बोधिन्यै । टं डं क्षमायै नमः । इति सर्वत्र । एताः संपूज्य । तत
तो मातृकां प्रातिलोम्येन उच्चरन् शुद्धोदकेन तं शंखं संपूर्य

नि ३
षं नीलायै ३

59

ॐ सोममंडलाय षोडशामृतकलात्मने श्रीरामार्चामृताय नमः
